Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

सुधर्मा संस्कृतदिनपत्रिका, मैसूरु
धर्मो रक्षति रक्षितः

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका - ६६ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि चतुर्थ्यां विशाखाक्षत्रयुक्त बुधवासरः ०५ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

वरं प्राणोच्छेदस्समदमघवन्मुक्तकुलिशः
प्रहारैरुद्रच्छद्बहुलदहनोद्गारगुरुभिः ।
तुषाराद्रेसूनोः अहह पितरि क्लेशविवशे
न चासौ संपातः पयसि पयसां पत्युरुचितः ।।

## पुस्तकवाचका विरलाः

अस्मिन् काले पुस्तकानां समृद्धिः, वाचकानां वैरल्यम्। लेखका भूयांसः, पाठका दुर्लभाः। तत्र कारणानि बहूनि सन्ति । जनानां समयाभावः। कार्यनिरताः श्रान्ताः गृहम् आगच्छन्ति। पुनर्गृहे कर्माणि अनिवार्याणि कुर्वन्ति । भुक्त्वा शयनम् अधिशेरते । पुस्तकवाचनस्य कोऽवकाशः ?

गृहिण्यस्तु गृहकर्मश्रान्ताः पतिं पुत्रं च कार्यालयं शालां च प्रेष्य ततो दूरदर्शनवीक्षणे निरता भवन्ति । तत्र मनोरञ्जनस्य भूयांसि कारणानि भवन्ति । काञ्चन दूरवाण्या भाषमाणाः प्रपञ्चम् एव विस्मरन्ति । यदि पुनः स्वल्पावकाशो लभ्यते, वृत्तान्तपत्रिकां पठन्ति । पुस्तकवाचनं तु स्वप्नेऽपि न कुर्वन्ति ।

अन्यदपि कारणं विद्यते पुस्तकानाम् अस्पर्शने। नूतनानि यन्त्राणि सन्ति येषु पुस्तकसाराः सुलभरूपेण प्राप्यते । अन्तर्जाले बहूनि पुस्तकानि विनामूल्यं लभ्यन्ते । अतः पुस्तकं क्रेतव्यम् इति चिन्ता दूरे भवति । अपि च पुस्तकरक्षणस्य बाधा नास्ति । गृहे वस्तूनां निधानायावकाशो लभ्यते । अतः कोऽपि धनं दत्त्वा पुस्तकं न क्रीणाति।

मैसूरुनगरे दशरात्रोत्सवसन्दर्भे सर्वकारेण पुस्तकमेला योजिता। तत्र विविधानि बहुसुन्दराणि पुस्तकानि प्रदर्शितानि । किं प्रयोजनम्? वाचकास्तत्र न दृश्यन्ते । आहारमेलायां जनानां प्रवेशो भवत्याहमहमिकया । पुष्पप्रदर्शनोद्याने च बहवो जनाः । पुस्तकप्रदर्शने तु क्रेतारो न सन्ति । पानाय भोजनाय विनोदाय धनं व्ययितुं जनास्सिद्धाः। पुस्तकक्रयणे कस्यापि उत्साहो नास्ति । सरस्वति, कथं लेखकान् रक्षिष्यसि ?

## याशिनोरिः नोबेल्प्रशस्तिम् अविन्दत

स्टाकहोम्-जीवकोशानां स्वभक्षण विषये अध्ययनं कृतवते जपान-देशस्य विज्ञानिने याशिनोरये ऐषमः वैद्यकीयक्षेत्रस्य नोबल्प्रशस्तिः घोषितास्ति । केषुचित् सन्दर्भेषु देहस्थाः जीवकोशाः स्वतः स्वात्मानमेव भक्षयन्ति। इयं नैसर्गिकी घोषितास्ति। केषुचित् सन्दर्भेषु देहस्थाः जीवकोशाः स्वतः स्वात्मानमेव भक्षयन्ति। इयं नैसर्गिकी व्यवस्था। अस्याः व्यवस्थायाः व्यत्यासे पार्किसन्मधु-मेहादिरोगाः उद्भवन्ति। अतः जीवकोशानां स्वभक्षणं मानवारोग्ये प्रमुखपात्रं वहति। एवं क्रमात् जीव कोशाः नश्यन्ति पुनः उद्भवन्ति देहे। अतः स्वभक्षणम् अत्यावश्यकम्। अस्याः प्रक्रियायाः वैफल्येन जीव-कोशानां हनिस्सम्भवति। अकाले वार्धक्यं च जायते। स्वभक्षणाय अपेक्षितं वंशवाहम् अन्वेष्टुं याशिनोरिः ईस्ट्पदार्थम् उपयुक्तवानासीत्। ईस्ट्पदार्थे यथा एषा प्रक्रिया भवति तथैव जीवकोशेषु भविष्यति इति याशि-नोरिः आन्विषत्। सम्प्रति एकसप्ततिवर्षवयाः याशिनोरिः टोकियोनगरस्य तान्त्रिकमहा-विद्यालये प्राध्यापकपदे अस्ति। एषः इतोऽपि बह्वीः प्रशस्तीः प्राप्तवान् अस्ति ।

### उपन्यासमालिका

मैसूरु-श्री वेङ्कटेशसभा संस्थायाः आश्रये श्री वेदान्तदेशिकानां उपन्यासमालिका २० तः २४ तम दिनाङ्कपर्यन्तं प्रचलिष्यति।

## कन्नडसम्मेलनम्

बेङ्गळूरु-कर्णाटकस्य कन्नडसाहित्य परिषदा इदम्प्रथमतया कर्णाटकात् बहिः कन्नडजनानां राष्ट्रियसम्मेलनम् आयोजितं वर्तते। परिषदः एकोत्तर-शतः वत्सराणाम् इतिहासे इदमेव प्रथमवारं सम्मेलनं बहिः भविता। अक्टोबरमासस्य अष्टमनवम-दिनाङ्कयोः देहलीनगरे कर्णाटकात् महिर्विद्यमानकन्नडभाषाजनानां राष्ट्रियसम्मेलनं भविष्यति । सोमवारे पत्रिकागोष्ठ्यां कन्नडसाहित्यपरिषदः अध्यक्षः मनुबलिगारः ''सम्पूर्णे राष्ट्रे विद्यमानाः कन्नडभाषाविद्वांसः चिन्तकाश्च सम्मेलनं प्रति आहूताः सन्ति। दिनद्वयात्मके सम्मेलने आहत्य पञ्च गोष्ठ्यः भविष्यन्ति। विभिन्नेभ्यः राज्येभ्यः त्रिशतं प्रतिनिधयः गण्याः विद्वांसः च आयास्यन्ति। देहलीनगरस्य कन्नडजनाः अपि भागं वक्ष्यन्ति। अतः आहत्य पञ्चशतात् षड्शतपर्यन्तं जनाः भागं ग्रहीष्यन्ति इति अस्ति निरीक्षा। कार्यक्रमस्य आयोजनाय सप्तचत्वारिंशल्क्ष-रूप्यकाणि अपेक्षितानि इति चिन्तयामः। एतस्मिन् धनराशौ सप्तचत्वारिंशत्लक्षरूप्यकाणि - परिषदा व्यवस्थाप्यते । अवशिष्टधनं अन्येषां साह्येन स्वीक्रियते। इन्दिरा गान्धिराष्ट्रियगिरिजनविश्वविद्यालयः लक्षद्वयं प्रादात्। इतोऽपि अनेके वदान्याः कार्यक्रमस्य विविधव्ययं निर्वहन्ति। सम्मेलने भागग्रीतॄन् पञ्चविंशतिं साहित्यरचयितॄन् कलाविदश्च कर्णाटकसर्वकारः ''राज्यस्य अतिथिः'' इति परिगणयति। अतः तेषां सम्पूर्णव्ययः सर्वकारेणैव प्रदीयते। तथैव कर्णाटकात् बहिः वर्तमानाः केचन प्रमुखाः साहित्यकाराः कविगोष्ठ्यां भागं वक्ष्यन्ति। बाहीककन्नडजनैः सह सम्पर्क-साधनमेव अस्य सम्मेलनस्य उद्देशं वर्तते। सम्मेलने कन्नडसाहित्यस्य कन्नडजनानां सन्मस्यानां शिक्षणमाध्यमस्य संस्कृतेः सीमा-समस्यायाः च विषयाणां चर्चा आयोज्यते। सम्मेलने उपस्थापित-विषयाः पञ्जीक्रियन्ते विभागं प्रति प्रेष्यन्ते। तथैव धनस्य आयोजनानु-सारेण पुस्तकमपि प्रकट्यते'' इति कार्यक्रमस्य स्वरूपं व्यवृणोत्।

## युद्धभीतिमध्ये शान्तिप्रक्रिया समारब्धा

नवदिल्ली-पाकाक्रमितकाश्मीर-प्रदेशेषु स्थितानि उग्रशिबिराणि भारतसेनायोधाः यदा आक्रम्य उग्रान् नाशयामासुः तदारभ्य उभय-देशयोः सीमाप्रदेशेषु युद्धभीतिः व्यापृता।। अत्रस्थाः नागरिका जनाः भीताः। कदा युद्धं भविष्यति । का हानिः स्यात्। वयं कथं स्थातव्यम् कं देशं गन्तव्यम्। किं कर्तव्यम् इत्येवंरीत्या मनसि चिन्तयन्तः भीतिमापन्नाः। एतेन भीताः उभयदेशयोः राष्ट्रियरक्षणामार्ग-दर्शकाः दूरवाणीद्वारा मिथः समालोच्य शान्तिं संस्थापयितुं क्रियाशीलास्समभवन्। उभयदेशयोः राष्ट्रियरक्षणामार्गदर्शकाः दुष्कृत्यानि परित्यज्य शान्त्या स्थातुं स्वस्वदेश जनान् कथयिष्याम इति ऊचुः। भारतदेशस्य राष्ट्रियरक्षणामार्गदर्शकः अजित् दोवल् पाकिस्तानदेशस्य रक्षणामार्गदर्शकेन नासिर्जंजुवेन साकं दूरवाण्या संभाष्य उभयदेशयोः नेतारः मिथः चर्चित्वा सन्धानेन समस्याः परिहर्तुं अभिलषन्ति। अतः युद्धं मास्तु। सर्वे शान्त्या अनुद्वेगेन च तिष्ठेयुः। युद्धभीतिं सर्वे नेतारः अपाकुर्युः। नागरिकजन-रक्षणा कार्यं प्रथमं करणीयम्। तेषु विश्वासं समुत्पादयेत् इति सर्वे बभणुः ।

## बारामुल्लाप्रदेशे शोधनकार्यं समाप्तम्

नवदिल्ली-भारतीयसेनायोधैः कृत-माततायिनिर्मूलनकार्यं विरुध्य उग्रात तायिनः बारामुल्लासेनाशिबिरमुपरि आक्रमणं कर्तुं प्रयत्नशीलाः अन्ते नैव सफला अभूवन्। एते उग्राः नागरिकजनानेव रक्षणाकवचनानि कारयित्वा पलायिता इत्याधि-कारिणः ऊचुः। आक्रमणमुद्दिश्य प्रतिक्रियावचनं वदन् मण्डलज्येष्ठ-रक्षकाधीक्षकः इतियाजहुसेन् चत्वारो पञ्चवा उग्राततायिनः सेना शिबिराण्युपरि आक्रमणानि समकुर्वन्। सीमाप्रदेशेषु रक्षणाकार्य निरताः भारतीययोधाः तानाक्रम्य नाशित्वा योग्यमुत्तरमेव ददुः। उग्राः अस्माकं योधानतिक्रम्य सेनाशिबिरं प्रवेष्टुमशक्ता अभूवन्। आक्रमणे एकःयोधः मृतः। द्वौ योधौ व्रणिता भूताम्। षट्सु होरासु उग्रान् शोधयितुं शोधकार्याणि योधैः कृतानि ।

## गान्धिविषयकपुस्तकपठने अमेरिकादेशः द्वितीयः

मुम्बै-गान्धिवर्यः स्वजीवितावधौ सकृदपि अमेरिकादेशं न गतः। परं तत्र बहवः तत्सम्बन्द्धपुस्तकपठना सक्ताः सन्ति । गान्धिविषयक-पुस्तकपठितॄणां सङ्ख्यागणनायां अमेरिकादेशः द्वितीयस्थानम् अविन्दत। गूगलनलटिक्स्संस्थया कृतेन अध्ययनेन अयमंशः बहिरायातः। महात्मनः विषये लेखान् पुस्तकानि च अन्तर्जाले पठितुम् आसक्ताः भारते एव अधिकतया सन्ति । परं भारतादन्तरं स्थानमस्ति अमेरिकादेशस्य । ऐषमः गान्धेः जन्मदिनं विश्वाहिंसादिनमिति घोषितं वर्तते विश्वसंस्थया महात्मनगान्धिनः अन्तर्जालपत्रे प्रत्यहं तद्विषक-लेखादयः स्थाप्यन्ते । आसक्ताः तान् सर्वान् स्वीकरिष्यन्ति । अन्तर्जालस्य विश्लेषणेन गान्धि-विषयकाध्ययनासक्ताः बहुषु देशेषु सन्तीति ज्ञायते। गतवत्सरे कोट्यधिकपुस्तकानि अन्तर्जालात् पठितृभिः स्वीकृतानि। तत्र षष्टिलक्षं जनाः भारतीयाः। पञ्चविंशतिलक्षं जनाः अमेरिकादेशीयाः इति विचारः समीक्षया ज्ञातः।

## शिक्षणस्तरः अधमः

नवदिल्ली-भारतदेशस्य शिक्षणस्तरः इतराभिवृद्धदेशानां शिक्षणस्तरस्य अपेक्षया अत्यन्तम् अधमस्थितौ वर्तते इति लज्जास्पदं विषयः भारतीयवाणिज्योद्यमस्य विवृतौ वर्तते। जागतिकशैक्षणिकमानकं प्राप्तुं भारतदेशेन इतोऽपि महान् कालः यापनीयः भवति। अधुना अधमस्थितेः कारणं प्रशिक्षित-शिक्षकरणाम् अभावः एव। तथैव सर्वकारेण क्रियमाणः धनव्ययः अपि इतरदेशधनव्ययापेक्षया न्यूनः एव इति अभिप्रायः विवृतौ सूचितः। अभिवृद्धदेशेषु महान् व्ययः शिक्षण सम्बद्थकार्यार्थम् एव क्रियते। अत्र तु न तथा । अतः शैक्षणिकस्तरस्य अधोगतिः दरीदृश्यते इति विवरणं तत्र प्रदत्तम् ।